अनिट्स्वरान्तो भवतीति दृश्यतामिमांस्तु सेटः प्रवदन्ति तद्विदः ।
अदन्तमृदन्तमृतां च वृङ्वृञौ श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि ॥

गणस्थमूदन्तमुतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्षणवः ।
इति स्वरान्ता निपुणं समुच्चितास्ततो हलन्तानपि सन्निबोधत ॥

[1]द्वये एव धातवः, स्वरान्ताः व्यञ्जनान्ताश्च । तत्र सर्वे स्वरान्ताः एकाचः अनुदात्ताः अदन्तादीन् वर्जयित्वा । [2]दाता । नेता । चेता । स्तोता । कर्ता । हर्ता । अदन्तादय उदात्ताः । अवधिष्ट । ॠदन्तम् – तरिता, [3]तरीता । ऋतां च वृङ्वृञौ – निर्वरिता, निर्वरीता[4] । प्रवरिता, प्रवरीता[5] । श्विडीङिवर्णेष्वथ शीङ्श्रिञावपि – श्वयिता । उड्डयिता । शयिता । श्रयिता । गणस्थमूदन्तम् – लविता । पविता । उतां च रुस्नुवौ क्षुवं तथोर्णोतिमथो युणुक्षणवः – रविता । प्रस्नविता । क्षविता । प्रोर्णविता । वाच्य ऊर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्[6] इत्यतिदेशाद् एकाच्त्वम् ऊर्णोतेरस्ति इति उदात्त उपदिश्यते । यविता । नविता । क्ष्णविता । इति स्वरान्ता निपुणं समुच्चितास्ततो हलन्तानपि सन्निबोधत ।

शकिस्तु कान्तेष्वनिडेक इष्यते घसिश्च सान्तेषु वसिः प्रसारणी ।

[7]घसिः प्रकृत्यन्तरमस्ति – घस्ता । वसिः प्रसारणी – वस्ता । प्रसारणी इति किम् ? वसिता वस्त्राणाम् । 'वस निवासे' (धा.पा. १००६) इत्यस्य यजादित्वात् संप्रसारणं विहितम्, न तु 'वस आच्छादने' (धा.पा. १०२४) इत्यस्य ।

रभिस्तु भान्तेष्वथ मैथुने यभिस्ततस्तृतीयो लभिरेव नेतरे ॥

आरब्धा । [8]यब्धा । लब्धा ।

यमिर्यमन्तेष्वनिडेक इष्यते रमिश्च यश्च श्यनि पठ्यते मनिः ।
नमिश्चतुर्थो [9]हनिरेव पञ्चमो गमिश्च षष्ठः प्रतिषेधवाचिनाम् ॥

यन्ता । रन्ता । मन्ता । श्यनि इति किम् ? [10]मनुतेः मनिता इत्येव भवति । नन्ता । हन्ता । गन्ता ।

दिहिर्दुहिर्मेहतिरोहती वहिर्नहिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया गणेषु हान्ताः प्रविभज्य कीर्तिताः ॥

[11]देग्धा । दोग्धा । मेढा । रोढा । वोढा । नद्धा । दग्धा । लेढा । मुक्तसंशयाः इति किम्? तन्त्रान्तरे चत्वारोऽपरे पठ्यन्ते । सहिमुहिरिहिलुहयः । तत्र [12]सहेर्विकल्पस्तकारादौ, मुहिरपि रधादौ पठ्यते, तेन तौ ससंशयौ सविकल्पौ । इतरौ तु धातुषु न पठ्येते, कैश्चिदभ्युपगम्येते इति स्वरूपेणैव [13]ससंशयौ ।

---

1. अत्र द्विविधा धातवः क, अत्र द्वेधा धातवः इ. 2. धाता क. 3. तरितुं ब.ड, तरीतव्यम् क. 4. निर्वरितुम् निर्वरीतुम् निवरितव्यम् निवरीतव्यम्, इत्यधिकम् क. 5. प्रवरितुम् प्रवरीतुम्, प्रवरितव्यम् प्रवरीतव्यम् इत्यधिकम् क. 6. आमश्च प्रतिषेधार्थमेकाचश्चेदुपग्रहात् इत्यधिकम् क. ई. ह. इ. 7. शक्ता शक्तुं शक्तव्यम् इत्यधिकम् क. 8. नास्ति ब. 9. हलिरेव क. 10. मन्यतेः क. 11. नास्ति इ. 12. सहेरिडविकल्पः ब.हृ.ड. 13. सन्दिग्धौ क.